श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ षड्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षड्विंशः सर्गः ॥

## रावणस्य रम्भाया उपरि बलात्कारो नलकूबरेण रावणाय घोरशापदानं च

स तु तत्र दशग्रीवः सह सैन्येन वीर्यवान्।
अस्तं प्राप्ते दिनकरे निवासं समरोचयत्॥ **7.26.1** ॥

उदिते विमले चन्द्रे तुल्यपर्वतवर्चसि।
प्रसुप्तं सुमहत् सैन्यं नानाप्रहरणायुधम्॥ **7.26.2** ॥

रावणस्तु महावीर्यो निषण्णः शैलमूर्धनि।
स ददर्श गुणांस्तत्र चन्द्रपादपशोभितान्॥ **7.26.3** ॥

कर्णिकारवनैर्दीप्तैः कदम्बबकुलैस्तथा।
पद्मिनीभिश्च फुल्लाभिर्मन्दाकिन्या जलैरपि॥ **7.26.4** ॥

चम्पकाशोकपुन्नागमन्दारतरुभिस्तथा।
चूतपाटललोध्रैश्च प्रियङ्ग्वर्जुनकेतकैः॥ **7.26.5** ॥

तगरैर्नारिकेलैश्च प्रियालपनसैस्तथा।
एतैरन्यैश्च तरुभिरुद्भासितवनान्तरे॥ **7.26.6** ॥

किन्नरा मदनेनार्ता रक्ता मधुरकण्ठिनः।
समं सम्प्रजगुर्यत्र मनस्तुष्टिविवर्धनम्॥ **7.26.7** ॥

विद्याधरा मदक्षीबा मदरक्तान्तलोचनाः।
योषिद्भिः सह सङ्क्रान्ताश्चिक्रीडुर्जहृषुश्च वै॥ **7.26.8**॥

घण्टानामिव सन्नादः शुश्रुवे मधुरस्वनः।
अप्सरोगणसङ्घानां गायतां धनदालये॥ **7.26.9**॥

पुष्पवर्षाणि मुञ्चन्तो नगाः पवनताडिताः।
शैलं तं वासयन्तीव मधुमाधवगन्धिनः॥ **7.26.10**॥

मधुपुष्परजःपृक्तं गन्धमादाय पुष्कलम्।
प्रववौ वर्धयन् कामं रावणस्य सुखोऽनिलः॥ **7.26.11**॥

गेयात् पुष्पसमृद्ध्या च शैत्याद् वायोर्गिरेर्गुणात्।
प्रवृत्तायां रजन्यां च चन्द्रस्योदयनेन च॥ **7.26.12**॥

रावणः स महावीर्यः कामस्य वशमागतः।
विनिःश्वस्य विनिःश्वस्य शशिनं समवैक्षत॥ **7.26.13**॥

एतस्मिन्नन्तरे तत्र दिव्याभरणभूषिता।
सर्वाप्सरोवरा रम्भा पूर्णचन्द्रनिभानना॥ **7.26.14**॥

दिव्यचन्दनलिप्ताङ्गी मन्दारकृतमूर्धजा।
दिव्योत्सवकृतारम्भा दिव्यपुष्पविभूषिता॥ **7.26.15**॥

चक्षुर्मनोहरं पीनं मेखलादामभूषितम्।
समुद्वहन्ती जघनं रतिप्राभृतमुत्तमम्॥ **7.26.16**॥

कृतैर्विशेषकैरार्द्रैः षडर्तुकुसुमोद्भवैः।
बभावन्यतमेव श्रीः कान्तिश्रीद्युतिकीर्तिभिः॥ **7.26.17**॥

नीलं सतोयमेघाभं वस्त्रं समवगुण्ठिता।
यस्या वक्त्रं शशिनिभं भ्रुवौ चापनिभे शुभे॥ **7.26.18**॥

ऊरू करिकराकारौ करौ पल्लवकोमलौ।
सैन्यमध्येन गच्छन्ती रावणेनोपलक्षिता॥ **7.26.19**॥

तां समुत्थाय गच्छन्तीं कामबाणवशं गतः।
करे गृहीत्वा लज्जन्तीं स्मयमानोऽभ्यभाषत॥ **7.26.20**॥

क्व गच्छसि वरारोहे कां सिद्धिं भजसे स्वयम्।
कस्याभ्युदयकालोऽयं यस्त्वां समुपभोक्ष्यते॥ **7.26.21**॥

त्वदाननरसस्याद्य पद्मोत्पलसुगन्धिनः।
सुधामृतरसस्येव कोऽद्य तृप्तिं गमिष्यति॥ **7.26.22**॥

स्वर्णकुम्भनिभौ पीनौ शुभौ भीरु निरन्तरौ।
कस्योरःस्थलसंस्पर्शं दास्यतस्ते कुचाविमौ॥ **7.26.23**॥

सुवर्णचक्रप्रतिमं स्वर्णदामचितं पृथु।
अध्यारोक्ष्यति कस्तेऽद्य जघनं स्वर्गरूपिणम्॥ **7.26.24**॥

मद्विशिष्टः पुमान् कोऽद्य शक्रो विष्णुरथाश्विनौ।
मामतीत्य हि यच्च त्वं यासि भीरु न शोभनम्॥ **7.26.25**॥

विश्रम त्वं पृथुश्रोणि शिलातलमिदं शुभम्।
त्रैलोक्ये यः प्रभुश्चैव मदन्यो नैव विद्यते॥ **7.26.26**॥

तदेवं प्राञ्जलिः प्रह्वो याचते त्वां दशाननः।
भर्तुर्भर्ता विधाता च त्रैलोक्यस्य भजस्व माम्॥ **7.26.27**॥

एवमुक्ताब्रवीद् रम्भा वेपमाना कृताञ्जलिः।
प्रसीद नार्हसे वक्तुमीदृशं त्वं हि मे गुरुः॥ **7.26.28**॥

अन्येभ्योऽपि त्वया रक्ष्या प्राप्नुयां धर्षणं यदि।
तद्धर्मतः स्नुषा तेऽहं तत्त्वमेतद् ब्रवीमि ते॥ **7.26.29**॥

अथाब्रवीद् दशग्रीवश्चरणाधोमुखीं स्थिताम्।
रोमहर्षमनुप्राप्तां दृष्टमात्रेण तां तदा॥ 7.26.30॥

सुतस्य यदि मे भार्या ततस्त्वं हि स्नुषा भवेः।
बाढमित्येव सा रम्भा प्राह रावणमुत्तरम्॥ 7.26.31॥

धर्मतस्ते सुतस्याहं भार्या राक्षसपुङ्गव।
पुत्रः प्रियतरः प्राणैर्भ्रातुर्वैश्रवणस्य ते॥ 7.26.32॥

विख्यातस्त्रिषु लोकेषु नलकूबर इत्ययम्।
धर्मतो यो भवेद् विप्रः क्षत्रियो वीर्यतो भवेत्॥ 7.26.33॥

क्रोधाद् यश्च भवेदग्निः क्षान्त्या च वसुधासमः।
तस्यास्मि कृतसङ्केता लोकपालसुतस्य वै॥ 7.26.34॥

तमुद्दिश्य तु मे सर्वं विभूषणमिदं कृतम्।
यथा तस्य हि नान्यस्य भावो मां प्रति तिष्ठति॥ 7.26.35॥

तेन सत्येन मां राजन् मोक्तुमर्हस्यरिन्दम।
स हि तिष्ठति धर्मात्मा मां प्रतीक्ष्य समुत्सुकः॥ 7.26.36॥

तत्र विघ्नं तु तस्येह कर्तुं नार्हसि मुञ्च माम्।
सद्भिराचरितं मार्गं गच्छ राक्षसपुङ्गव॥ 7.26.37॥

माननीयो मम त्वं हि पालनीया तथास्मि ते।
एवमुक्तो दशग्रीवः प्रत्युवाच विनीतवत्॥ 7.26.38॥

स्नुषास्मि यदवोचस्त्वमेकपत्नीष्वयं क्रमः।
देवलोकस्थितिरियं सुराणां शाश्वती मता॥ 7.26.39॥

पतिरप्सरसां नास्ति न चैकस्त्रीपरिग्रहः।
एवमुक्त्वा स तां रक्षो निवेश्य च शिलातले॥ 7.26.40॥

कामभोगाभिसंरक्तो मैथुनायोपचक्रमे।
सा विमुक्ता ततो रम्भा भ्रष्टमाल्यविभूषणा॥ **7.26.41** ॥

गजेन्द्राक्रीडमथिता नदीवाकुलतां गता।
लुलिताकुलकेशान्ता करवेपितपल्लवा॥ **7.26.42** ॥

पवनेनावधूतेव लता कुसुमशालिनी।
सा वेपमाना लज्जन्ती भीता करकृताञ्जलिः॥ **7.26.43** ॥

नलकूबरमासाद्य पादयोर्निपपात ह।
तदवस्थां च तां दृष्ट्वा महात्मा नलकूबरः॥ **7.26.44** ॥

अब्रवीत् किमिदं भद्रे पादयोः पतितासि मे।
सा वै निःश्वसमाना तु वेपमाना कृताञ्जलिः॥ **7.26.45** ॥

तस्मै सर्वं यथातत्त्वमाख्यातुमुपचक्रमे।
एष देव दशग्रीवः प्राप्तो गन्तुं त्रिविष्टपम्॥ **7.26.46** ॥

तेन सैन्यसहायेन निशेयं परिणामिता।
आयान्ती तेन दृष्टास्मि त्वत्सकाशमरिन्दम॥ **7.26.47** ॥

गृहीता तेन पृष्टास्मि कस्य त्वमिति रक्षसा।
मया तु सर्वं यत् सत्यं तस्मै सर्वं निवेदितम्॥ **7.26.48** ॥

काममोहाभिभूतात्मा नाश्रौषीत् तद् वचो मम।
याच्यमानो मया देव स्नुषा तेऽहमिति प्रभो॥ **7.26.49** ॥

तत् सर्वं पृष्ठतः कृत्वा बलात् तेनास्मि धर्षिता।
एवं त्वमपराधं मे क्षन्तुमर्हसि सुव्रत॥ **7.26.50** ॥

नहि तुल्यं बलं सौम्य स्त्रियाश्च पुरुषस्य हि।
एतच्छ्रुत्वा तु सङ्क्रुद्धस्तदा वैश्रवणात्मजः॥ **7.26.51** ॥

धर्षणां तां परां श्रुत्वा ध्यानं सम्प्रविवेश ह।
तस्य तत् कर्म विज्ञाय तदा वैश्रवणात्मजः॥ **7.26.52** ॥

मुहूर्तात् क्रोधताम्राक्षस्तोयं जग्राह पाणिना।
गृहीत्वा सलिलं सर्वमुपस्पृश्य यथाविधि॥ **7.26.53** ॥

उत्ससर्ज तदा शापं राक्षसेन्द्राय दारुणम्।
अकामा तेन यस्मात् त्वं बलाद् भद्रे प्रधर्षिता॥ **7.26.54** ॥

तस्मात् स युवतीमन्यां नाकामामुपयास्यति।
यदा ह्यकामां कामार्तो धर्षयिष्यति योषितम्॥ **7.26.55** ॥

मूर्धा तु सप्तधा तस्य शकलीभविता तदा।
तस्मिन्नुदाहृते शापे ज्वलिताग्निसमप्रभे॥ **7.26.56** ॥

देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता।
पितामहमुखाश्चैव सर्वे देवाः प्रहर्षिताः॥ **7.26.57** ॥

ज्ञात्वा लोकगतिं सर्वां तस्य मृत्युं च रक्षसः।
ऋषयः पितरश्चैव प्रीतिमापुरनुत्तमाम्॥ **7.26.58** ॥

श्रुत्वा तु स दशग्रीवस्तं शापं रोमहर्षणम्।
नारीषु मैथुनीभावं नाकामास्वभ्यरोचयत्॥ **7.26.59** ॥

तेन नीताः स्त्रियः प्रीतिमापुः सर्वाः पतिव्रताः।
नलकूबरनिर्मुक्तं शापं श्रुत्वा मनःप्रियम्॥ **7.26.60** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षड्विंशः सर्गः॥